नलोपाख्यानम्

9

बृहदश्व उवाच।

ततस्तु याते वार्ष्णेये पुण्यश्लोकस्य दीव्यतः।

पुष्करेण हृतं राज्यं यच्चान्यद्वसु किंचन॥ ३-५८-१ ॥

हृतराज्यं नलं राजन्प्रहसन्पुष्करो ऽब्रवीत्।

द्यूतं प्रवर्ततां भूयः प्रतिपाणो ऽस्ति कस्तव॥ ३-५८-२ ॥

pratipāṇa *m* – ставка противной стороны; отыгрыш, реванш;

शिष्टा ते दमयन्त्येका सर्वमन्यद्धृतं मया।

दमयन्त्याः पणः साधु वर्ततां यदि मन्यसे॥ ३-५८-३ ॥

पुष्करेणेवमुक्तस्य पुण्यश्लोकस्य मन्युना।

व्यदीर्यतेव हृदयं न चैनं किंचिदब्रवीत्॥ ३-५८-४ ॥

ततः पुष्करमालोक्य नलः परममन्युमान्।

उत्सृज्य सर्वगात्रेभ्यो भूषणानि महायशाः॥ ३-५८-५ ॥

एकवासा असंवीतः सुहृच्छोकविवर्धनः।

निश्चक्राम तदा राजा त्यक्त्वा सुविपुलां श्रियम्॥ ३-५८-६ ॥

saṃvīta *n* – одежда;

दमयन्त्येकवस्त्रा तं गच्छन्तं पृष्ठतो ऽन्वियात्।

स तया बाह्यतः सार्धं त्रिरात्रं नैषधो ऽवसत्॥ ३-५८-७ ॥

पुष्करस्तु महाराज घोषयामास वै पुरे।

नले यः सम्यगातिष्ठेत्स गच्छेद्वध्यतां मम॥ ३-५८-८ ॥

पुष्करस्य तु वाक्येन तस्य विद्वेषणेन च।

पौरा न तस्मिन्सत्कारं कृतवन्तो युधिष्ठिर॥ ३-५८-९ ॥

स तथा नगराभ्याशे सत्कारार्हो न सत्कृतः।

त्रिरात्रमुषितो राजा जलमात्रेण वर्तयन्॥ ३-५८-१० ॥

क्षुधा संपीड्यमानस्तु नलो बहुतिथे ऽहनि।

अपश्यच्छकुनान्कांश्चिद्धिरण्यसदृशच्छदान्॥ ३-५८-११ ॥

स चिन्तयामास तदा निषधाधिपतिर्बली।

अस्ति भक्ष्यो ममाद्यायं वसु चेदं भविष्यति॥ ३-५८-१२ ॥

ततस्तानन्तरीयेण वाससा समवास्तृणोत्।

तस्यान्तरीयमादाय जग्मुः सर्वे विहायसा॥ ३-५८-१३ ॥

उत्पतन्तः खगास्ते तु वाक्यमाहुस्तदा नलम्।

दृष्ट्वा दिग्वाससं भूमौ स्थितं दीनमधोमुखम्॥ ३-५८-१४॥

वयमक्षाः सुदुर्बुद्धे तव वासो जिहीर्षवः।

आगता न हि नः प्रीतिः सवाससि गते त्वयि॥ ३-५८-१५॥

तान्समीक्ष्य गतानक्षानात्मानं च विवाससम्।

पुण्यश्लोकस्ततो राजा दमयन्तीमथाब्रवीत्॥ ३-५८-१६॥

येषां प्रकोपादैश्वर्यात्प्रच्युतो ऽहमनिन्दिते।

प्राणयात्रां न विन्दे च दुःखितः क्षुधयार्दितः॥ ३-५८-१७॥

येषां कृते न सत्कारमकुर्वन्मयि नैषधाः।

त इमे शकुना भूत्वा वासो ऽप्यपहरन्ति मे॥ ३-५८-१८॥

वैषम्यं परमं प्राप्तो दुःखितो गतचेतनः।

भर्ता ते ऽहं निबोधेदं वचनं हितमात्मनः॥ ३-५८-१९॥

एते गच्छन्ति बहवः पन्थानो दक्षिणापथम्।

अवन्तीमृक्षवन्तं च समतिक्रम्य पर्वतम्॥ ३-५८-२०॥

dakṣiṇāpatha, avantī, ṛkṣavant – *nom. pr.*

एष विन्ध्यो महाशैलः पयोष्णी च समुद्रगा।

आश्रमाश्च महर्षीणाममी पुष्पफलान्विताः॥ ३-५८-२१॥

एष पन्था विदर्भाणामयं गच्छति कोसलान्।

अतः परं च देशो ऽयं दक्षिणो दक्षिणापथः॥ ३-५८-२२॥

ततः सा बाष्पकलया वाचा दुःखेन कर्शिता।

उवाच दमयन्ती तं नैषधं करुणं वचः॥ ३-५८-२३॥

उद्वेपते मे हृदयं सीदन्त्यङ्गानि सर्वशः।

तव पार्थिव संकल्पं चिन्तयन्त्याः पुनः पुनः॥ ३-५८-२४॥

हृतराज्यं हृतधनं विवस्त्रं क्षुच्छ्रमान्वितम्।

कथमुत्सृज्य गच्छेयमहं त्वां विजने वने॥ ३-५८-२५॥

श्रान्तस्य ते क्षुधार्तस्य चिन्तयानस्य तत्सुखम्।

वने घोरे महाराज नाशयिष्यामि ते क्लमम्॥ ३-५८-२६॥

cintayāna - размышляющий, рассматривающий;

न च भार्यासमं किंचिद्विद्यते भिषजां मतम्।

औषधं सर्वदुःखेषु सत्यमेतद्ब्रवीमि ते॥ ३-५८-२७॥

नल उवाच।

एवमेतद्यथात्थ त्वं दमयन्ति सुमध्यमे।

नास्ति भार्यासमं मित्रं नरस्यार्तस्य भेषजम्॥ ३-५८-२८॥

न चाहं त्यक्तुकामस्त्वां किमर्थं भीरु शङ्कसे।

त्यजेयमहमात्मानं न त्वेव त्वामनिन्दिते॥ ३-५८-२९॥

दमयन्त्युवाच।

यदि मां त्वं महाराज न विहातुमिहेच्छसि।

तत्किमर्थं विदर्भाणां पन्थाः समुपदिश्यते॥ ३-५८-३०॥

अवैमि चाहं नृपते न त्वं मां त्यक्तुमर्हसि।

चेतसा त्वपकृष्टेन मां त्यजेथा महीपते॥ ३-५८-३१॥

पन्थानं हि ममाभीक्ष्णमाख्यासि नरसत्तम।

अतोनिमित्तं शोकं मे वर्धयस्यमरप्रभ॥ ३-५८-३२॥

abhīkṣṇam *adv.* - постоянно, все время;

यदि चायमभिप्रायस्तव राजन्व्रजेदिति।

सहितावेव गच्छावो विदर्भान्यदि मन्यसे॥ ३-५८-३३॥

विदर्भराजस्तत्र त्वां पूजयिष्यति मानद।

तेन त्वं पूजितो राजन्सुखं वत्स्यसि नो गृहे॥ ३-५८-३४॥